॥ॐ श्रीगणेशाय नमः॥ अथ गृहप्रतिष्ठा लिख्यते॥ विलोक्य मंत्रिणामेव मिह वाजसनेयिनां॥ वक्ष्ये गृहप्र
तिष्ठाहं कर्म सम्यक्फलप्रदं १ तत्र प्रवेशविधिः॥ स्वकं कुंभं पुरस्कृत्य धेनुं विप्रकुमारकौ॥ प्रदक्षिणं २
विधायाथ प्रविशेद्वाममदिवाकरः स्नातः सुखी सुवासश्च वेदघोषैः सुमंगलैः स्वभार्यया विशेद्गृहं तत्र
विप्रांश्च पूजये ३ तत्र चंद्रताराऽनुकूले शुभे दिने गृहप्रवेशं कृत्वा॥ कृतस्नानादिराचम्य॥ प्राङ्मुख उ
पविश्य॥ कुशादिकमादाय संकल्प्य॥ ॐ अद्याऽमुकमासेऽमुकपक्षेऽमुकतिथौ स्वर्गलोकादिकप्राप्ति
कामः गृहप्रतिष्ठापदेनाहं यक्ष्ये इति संकल्पं कुर्यात्॥ मातृपूजां कृत्वा॥ वसोर्धाराऽभ्युदयिकश्राद्धा
नि कृत्वा ब्राह्मणत्रयमृत्स्वमुपवेश्य हिरण्यवस्त्रपुष्पचंदनतांबूलानादिभिः परितोष्य॥ ॐ पुण्याहं॥ भ
वंतो ब्रुवंत्विति तान् विश्रावयेत् एवं पुण्याहं भवंतः कुर्वंत्विति ब्रूयाद्यजमानः ततो वस्त्रकुंडलमौक्तिकपूरक
टकादिभिः गुरुमलंकृत्य वरणसंभृतिमादाय वार्यं वरणुपात् ॐ अद्य कर्तव्यगृहप्रतिष्ठा[illegible]ख्योगभू
तहोमकर्मण्यमुकगोत्रोऽहममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलहेमवासोभिराचार्यत्वेन त्वामहं वृणे
इति ब्रूयात्॥ ॐ वृतोऽस्मीति प्रतिवचनं ॐ यथाविहितं कर्म कुर्विति यजमानेनोक्ते करवाणीत्याचार्यो ब्रूयात्॥
ततः पश्चिमद्वारेण प्रविश्योपविश्य तत्र पुण्याहनिर्गुण्याहवाचपूर्वकं गृहस्य प्रागुदक्प्लवदेशे वेदिं गर्भं च

रामा[illegible]कुंसंमंडपंकुर्यात्। मंडपचतुर्थांशविस्तृता वेदी भवति। विस्तारं चतुर्थांशो छित्वा। मंडपस्य पूर्वे द्वारं मत्स्यकलं
भवति। उंडुंबरं दक्षिणतः। न्यग्रोधं पश्चिमतः। प्लक्षं उत्तरतः। चतुर्हस्तं छित्वा त्रिभूमौ हस्तप्रविष्टानि विस्तरतो
द्विहस्तानि मंडपोपरि एका ध्वजा कार्या। पंचहस्तदीर्घेण विस्तारेण हस्तप्रमाणेन तदनुपाताद् क्रमेण दशपता
काः भवति। हस्तप्रमाणवितस्तिविस्तृता। पीता रक्ता श्यामा नीला शुक्ला धूम्रवर्णा। हरिता पंचवर्णा रक्ता गौर
राः। ततः स्तंभमूलेषु रक्ताः पल्लवाः वस्त्रवेष्टिताः। सफलाः एकैकस्यापनीयाः द्वौ द्वौ कलशौ प्रतिद्वारं। ततो वेद्याः सपादहस्तांतर
त्यक्तापयासं भकुंडकरणं। तत्र आचार्यादिवरणं कार्यम्। ततः पश्चात् ततो मंडपात् पश्चिमे देशे गोमयेनोपलिप्तासने प्राङ्मुखो उदङ्मुखो वा य
जमान उपविश्य वरणसमर्थं उपकल्पति स्वस्ति गम्यः। प्रत्येकं कुंडलद्वय सूत्रकं पूर्वदत्तपकं ठामरणं अंगुली[illegible]नेयपितरूपमलंका
रमेकं गुणमलिजेदद्यात्। द्विगुणं गुणे समर्थ्य। उदङ्मुखोपविष्टं गुरुं वेदांतविदं स्मार्थदेशप्रणीतं कुलशीलीयुतं पूरणमभिमतिरहं
प्रसन्नगंभीरसरस्वतीकं ठमितां वरधरं मंत्रविदं त्रितद्रूपं गृह्याद्युक्तं गंगावास्वर्चनेन यत्नेनाहं यजे। त्वमेतं गुरवं मे तिप्रार्थ्य भवानी
तितेनोक्तः। अमुकगोत्र अमुकशाखाध्यायिनं अमुकशर्माणं ब्राह्मणं एभिः स्व्रदनपुष्पाहतैर्ताम्बूलवासोभिः गुरुत्वेन त्वामहं वृणे इति
गुरुर्वतोस्मीति प्रतिवचनं। एवमृग्वेदिनो द्वौ यजुर्वेदिनो द्वौ सामवेदिनौ द्वौ अथर्वणकौ द्वौ गुरुत्वेन तिस्थाने होतृत्वेन त्वामहं वृ
णे इति प्रत्येकं वरणुपात्। वृतोस्मीति प्रत्येकं प्रत्युक्तेः एवमष्टौ जापकान् जापकत्वेन त्वामहं वृणे। पाष्ठौ द्वारपालत्वेन त्वामहं
वृणे इति। प्रत्येकं वरणुपात्। एवं पंचविंशतिरृत्विजो भवंति। एवं वेदशाखा चतुरो होमकांश्चतुरो जापकान्स्नातकान् द्वारपा
लेकान् गुरुं चत्र पाद्दश्यान् पूर्वोक्तक्रमेण वरणुपात्। अत्राप्य शक्तावेकमग्निविधाने गुरुं कर्मकर्तुमाचार्यमेव वरणु
यात्। शाखांतराधीतमंत्रहोमस्य सर्वेषां जापकद्वारपालानां तत्कर्मणं विनरतिरेवेति। तस्मात्स्वधपवैकरणाचार्यपेत॥

पूर्णाहुतिं दद्यात्॥ संस्कृत्य॥ स्तंभस्थाना॥ श्वेते कुम्भे प्रत्यवटमाग्नेयकोणादारभ्य होमः कार्यः॥ अच्युताय भौमाय स्वाहा
ऽ इत्यनेन मंत्रेण प्रत्यवटं मंत्रवत्तिः॥ २६ अच्युताय भौमाय पतिप्रत्याहुतित्यागः॥ अथ प्रत्यवटं तु सीशिलास्थापनं
ऽ इत्यनेन मंत्रेण प्रत्यवटं स्तंभोच्छ्रयणं॥ इमामित्यादिमंत्राणां विश्वामित्रऋषिः शालादेवता त्रिष्टुप्छंदः ऽ
तदुपरि स्तंभोच्छ्रयणे॥ इमामुच्छ्रयाकुशरस्तु रूपास्त्रावत्सो जगतीः॥ सः॥ भुवनस्य नाभिं वसोर्धारां
ॐ सिंस्तंभोच्छ्रयणे विनियोगः॥ इमामुच्छ्रयामि कुशरस्तु स्त्राव वत्सो जगती॥ सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवि
प्रतरिणीं वसूनां॥ अथ मंत्रः॥ ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवि
त्रेण शतधारेण सुप्वा कामधुक्षः॥ इति मंत्रेण॥ इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा॥ अश्वावती गोमती सू
नृतावत्युच्छ्रयस्व महते सौभगाय॥ अश्वात्वा शिशुराक्रंदत्वा गावो धेनवो वाश्यमानाः॥ आत्वा कुमारस्तरुणः॥ कु
मारो दधिः कलशैरूपा यन्तु॥ इति वसोर्धारापं चमध्यस्तंभो नितनत अनुष्टुप स्तंभस्थापन मंत्रो॥ ॐ हेमस्य पत्नी बृहती
सुवासा रयिं नो धेहि सुभगे सुवीर्यं॥ अश्वावद्गोमदूर्जस्वत्पर्णं वनस्पतेरिव अभि नः पूर्जताम्॥ रयिरिदं अनु
यावसान स्वाहा॥ इत्यनेन मंत्रेण स्तंभ चतुष्टयोच्छ्रयणमवटे होमः क्रमेणैवं भेदेन प्रति स्तंभ मंत्रपाठः॥ स्तंभ
भावेन मंत्रेण प्रत्यवटं शिलास्थापनं॥ ततः अर्द्धनिष्पन्नायां शालायां शालामध्ये आवस्थ्याग्निं पंचभूसंस्कारैः
संस्कृत्य तैर्देवैः स्थापयेत्॥ अग्नेः पश्चात् प्राङ्मुख उपविश्य॥ ॐ अद्येत्यादि शालाकर्माहं करिष्ये इति संकल्प्य देवताधिष्ठा
नं कुर्यात्॥ ॐ वास्तोष्पतिं प्रजापतिमिंद्रमग्निं सोमं पूषणं च इन्द्राग्नी इंद्रं बृहस्पतिं विश्वान्देवान् सरस्वतीं वीणां सर्पान्
देवजनान् हिमवंतं पर्वतं सुदर्शनं वसूनां रुद्रान् आदित्यान् ईशानं जगदादिपूर्वाह्ण अपराह्णं मध्यंदिनं प्रदोषं मध्यरात्रिं व्युष्

ॐ देवीमहापथ्यां कर्तारं विकर्त्तारं विश्वकर्माणमोषधीवनस्पतीन् धातारं विधातारं निधीनां पतिं ब्रह्माणं प्रजापतिं वरुणास्व
ष्टकृतं शेषेण॥ मंत्रः॥ इति॥ भूरादीनां पूर्ववत्॥ ततो ब्राह्मणमुपविश्य॥ उत्तरतउदकपात्रं स्थापयित्वा॥ प्रणीतापात्रं प्रणयनं कृ
त्वा ब्रह्मसहितां कुशकंडिकां कुर्यात्॥ तत्र यथा॥ प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य॥ कुशैराच्छाद्य॥ ब्रह्मणो मुखमव
लोक्याग्नेरुत्तरतः कुशोपरि निदध्यात्॥ ततः परिस्तरणं बर्हिषश्चतुर्थभागमादाय॥ आग्नेयादीशानांतं ब्रह्मणोऽग्निपर्यंतं॥ नै
ऋत्याद्वायव्यांतं॥ अग्नितः प्रणीतापर्यंतं॥ ततोऽग्नेरुत्तरतः॥ पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं॥ पवित्रकरणा
र्थं साग्रमनंतरगर्भकुशपत्रद्वयं॥ प्रोक्षणीपात्रं॥ आज्यस्थाली॥ संमार्जनार्थं कुशत्रयं॥ उपयमनार्थं वेणीरूपकुशत्रयं
समिधस्तिस्रः॥ स्रुवः॥ आज्यं॥ षट्पंचाशदुत्तरवरार्थमुष्टिशतद्वयावच्छिन्नतंदुलपूर्णपात्रं॥ पवित्रच्छेदनकुशानां पू
र्वदिशि क्रमेणासादनीयं॥ ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रे छित्वा॥ सपवित्रकरेण प्रणीतोदकं त्रिः प्रो
क्षणीपात्रे निधाय॥ अनामिकांगुष्ठाभ्यां॥ तज्जलं त्रिरुत्पूय॥ प्रणीतोदकेन प्रोक्षणीमभिषिंच्य॥ प्रोक्षणीजलेन
न यथासादितवस्तुसेचनं कृत्वा॥ अग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निधाय॥ आज्यस्थाल्यामाज्यं निरूप्य॥ अ
ध्यधिश्रयणं॥ ततः कुशं प्रज्वाल्याज्योपरि प्रदक्षिणं भ्रामयित्वा॥ वह्नौ तत्क्षिप्य॥ स्रुवं त्रिः प्रतप्य॥ संमार्जनकुशा
नामग्रैरंतरतो मूलैर्बाह्यतः॥ स्रुवं संमार्ज्य॥ प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य दक्षिणतो निदध्यात्॥ ततः आज्य
स्यावतार्य॥ त्रिः प्रोक्षणीवदुत्पूय॥ अवेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा॥ पुनः प्रोक्षणीवदुत्पूय॥ ततउपयमनकुशान्वा
महस्ते कृत्वा॥ प्रजापतिं मनसा ध्यात्वा॥ तूष्णीं घृताक्ताः समिधः क्षिपेत्॥ उपविश्य सपवित्रप्रोक्षण्युदकेन प्र
दक्षिणक्रमेणाग्निपर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय॥ पातितदक्षिणजानुः॥ कुशेन ब्राह्मणान्वारब्धः॥ स

मिद्धृतमेऽस्मै स्रुवेणाज्याहुतीर्जुहोति परास्त्रं तस्याज्याहुतयः। वास्तोष्पतय इत्यादीनां चतुर्णां परमेष्ठी ऋषिर्वास्तो
ष्पतिर्देवताऽऽद्यस्य गायत्री छन्दः अन्येषां त्रिष्टुप् छन्दः होमे विनियोगः। ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावे
शो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा। इदं वास्तोष्पतये॥१॥ वास्तो
ष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो। अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति तन्नो जुषस्व स्वाहा॥
इदं वास्तोष्पतये॥२॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं
पात स्वस्तिभिः सदा नः स्वाहा। इदं वास्तोष्पतये॥३॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव
एधि नः स्वाहा। इदं वास्तोष्पतये॥४॥ ततः आघारावाज्यभागौ हुत्वा ॐ प्रजापतये स्वाहा। इदं प्रजापतये॥१॥
ॐ इन्द्राय स्वाहा। इदं मिन्द्राय॥२॥ ॐ अग्नये स्वाहा॥३॥ इदमग्नये। ॐ सोमाय स्वाहा। इदं सोमाय॥४॥ इत्याघारावाज्यभागौसवा
ज्यभागौ। ततः स्थालीपाकेनाष्टाहुतयः। ॐ अग्निमिन्द्रं बृहस्पतिं विश्वान्देवानुपह्वये सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः॥
स्वाहा। इदमग्नय इन्द्राय बृहस्पतये विश्वेभ्यो देवेभ्यः सरस्वत्यै वाजिनेभ्यः। सर्पा ये च सर्पदेवजनान्सर्वान्हिमवन्तं सुदर्शनं च
वसूंश्च रुद्रांश्चादित्यानीशानं जगदैः सह। एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा। इदं सर्पदेवजनेभ्यो हिमवते सु
दर्शनाय वसुभ्यो रुद्रेभ्य आदित्येभ्य ईशानाय जगदेभ्यः। पूर्वाह्णमपराह्णं चोभौ मध्याह्नेन सह। प्रदोषमर्धरात्रं
च व्युष्टां देवीं महापथाम्। एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा॥३॥ इदं पूर्वाह्णायापराह्णाय मध्याह्नाय प्रदोषायार्धरात्राय व्यु
ष्टायै देव्यै महापथायै च। ॐ कर्तारं विकर्तारं विश्वकर्माणमोषधीश्च वनस्पतीन्। एतान्सर्वान्प्रपद्येऽहं वास्तु मे
दत्त वाजिनः स्वाहा॥४॥ इदं कर्त्रे विकर्त्रे विश्वकर्मण ओषधीभ्यो वनस्पतिभ्यश्च। ॐ धातारं च विधातारं निधीनां च पतिं
सह। एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा॥५॥ इदं धात्रे विधात्रे निधीनां पतये च। ब्राह्मणस्थाने शिवमि

देवास्तु इदं प्रजावती सर्वाभ्यो देवताः स्वाहा। इदं ब्रह्मणे प्रजापतये सर्वेभ्यो देवताभ्यश्च। अथ स्थालीपाकेन स्विष्टकृद्धोमः॥
ओं अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। ततो महाव्याहृत्यादिप्राजापत्यांतान् नवाहुतयः। ओं भूः स्वाहा। इदमग्नये॥ ओं
भुवः स्वाहा। इदमग्नये। ओं भुवः स्वाहा। इदं वायवे। ओं स्वः स्वाहा। इदं सूर्याय। ओं त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवया
सिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा। इदमग्निवरुणाभ्यां। ओं स त्वन्नो अग्नेऽवमो भवोती ने
दिष्ठो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा। इदमग्निवरुणाभ्यां। ओं अयाश्चा
ग्नेस्यानभिसस्तिपाश्च सत्यमित्त्वमयासि। अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा। इदमग्नये। ओं ये ते शतं
वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सविता विष्णुर्विश्वाभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः। ओं उदुत्तमं व
रुणपाशमस्मदवाधमं विमध्यमं श्रथाय। अथा वयमादित्य व्रते तवानागसो स्वाहा। इदं वरुणायादित्याय। ८ स्वाराप्र
वैवत। ओं प्रजापतये स्वाहा। इदं प्रजापतये। ओं रुद्राय स्वाहा। इदं रुद्राय। संस्रवप्राशनं। स्रोत्रम्या। ब्रह्मणे दक्षिणां दद्यात्
॥होमः॥ अनंतरं वास्तुपूजनं कुर्यात। एवं गुणविशिष्टायां पुण्यतिथौ गृहप्रवेशांगवास्तुपूजनसंकल्पकर्म समस्तपूर्वं ई
शानादिरुद्रदासपर्यंतानां पंचचत्वारिंशद्वास्तुदेवतानां पूजनमहं करिष्ये॥ तत्र मंत्रः वास्तुपूजने। वेदेनैव पुष्पगंधादिना वा॥
ईशानादिरुद्रदासपर्यंतानां इदमावाहनं पंचचत्वारिंशद्देवताभ्यः। इदमासनं। २। इदं पाद्यं। ३। इदमर्घ्यः। ४। इदमाचमनीयं।
इदं स्नानं। ६। इदं वस्त्रं। ७। इदं यज्ञोपवीतं। ८। इदमुत्तरीयं। ९। इदमनुलेपनं। १०। इमानि पुष्पाणि। ११। इदं धूपं। इमं दीपं। १२। इदं नैवे
द्यं। इदं तांबूलादि फलदानं। इति नमस्कारः॥ १६॥ ईशानाय नमः। पूजां नैवेद्यं घृतौदनं। ईशानाय स्वाहा। १। पर्जन्याय नमः। पूजा २
नैवेद्यं पूर्ववत् घृतौदनं फलं। पर्जन्याय स्वाहा। २। जयंताय नमः। पूजां नैवेद्यं पीतध्वजं पोटिकं कूर्मं विन्यसेत्। जयंताय स्वा
हा। ३। इंद्राय नमः। पंचरत्नानि पेटिकं कुलसं। इंद्राय स्वाहा। ४। सूर्याय नमः। पूजां धान्यं नैवेद्यं। सूर्याय स्वाहा। ५। सत्याय नमः॥
पूजां नैवेद्यं घृतगोधूमान्नं। सत्याय स्वाहा। ६। भृशाय नमः। पूजां नैवेद्यं मत्स्यमांसान्नं। भृशाय स्वाहा। ७। अंतरिक्षाय न

४ ज्म०

मः।पूजाय कुल्लीनैवेद्यं।अंतरिक्षाय स्वाहा।८॥वायवे नमः।इदं शाकं नैवेद्यं वायवे स्वाहा।९।पूष्णे नमः।इदं लाजा नैवेद्यं पूष्णे
स्वाहा।१०।वितथाय नमः।इदं चणकौदनं नैवेद्यं वितथाय स्वाहा।११।गृहक्षताय नैवेद्यं।गृहक्षताय स्वाहा।१२।यमाय
नमः।मध्वोदनं नैवेद्यं यमाय स्वाहा।१३।गंधर्वाय नमः।इदं गंधोदनं नैवेद्यं गंधर्वाय स्वाहा।१४॥भृंगराजाय न
मः।इदं मत्स्यजिह्वान्नं नैवेद्यं भृंगराजाय स्वाहा।१५।मृगाय नमः।इदं चणकान्नं नैवेद्यं मृगाय स्वाहा।१६।पितृगणाय नमः
इदं कृशरान्नं नैवेद्यं पितृगणाय स्वाहा।१७।दौवारिकाय नमः।इदं पिप्पलीबलिं नैवेद्यं दौवारिकाय स्वाहा।१८।सुग्रीवाय
नमः।इदं पोली नैवेद्यं सुग्रीवाय स्वाहा।१९।भृंगपतये नमः।पुष्पदंताय नमः।इदं पायसं नैवेद्यं पुष्पदंताय स्वाहा।२०।
वरुणाय नमः।इदं पद्मकुशस्तंबं नैवेद्यं वरुणाय स्वाहा।असुराय नमः।हिरण्मयसुरा नैवेद्यं असुराय स्वाहा।२२।
शोषाय नमः।धूपाचणकयुतौदनं नैवेद्यं शोषाय स्वाहा।२३॥पापयक्ष्मणे नमः।इदं घृतमिलद्रुकं नैवेद्यं पापयक्ष्मणे स्वा
हा।२५।रोगाय नमः।इदं लड्डुकं नागपाशं नैवेद्यं नागाय नमः।इदं पक्वान्नमोदकं नैवेद्यं नागाय स्वाहा।२६।मुख्याय नमः।इदं शा
लुनैवेद्यं मुख्याय स्वाहा।२७।भल्लाटाय नमः।इदं शालिनैवेद्यं भल्लाटाय स्वाहा।२८।सोमाय नमः।इदं पोली नैवेद्यं सोमाय स्वा
हा।२९।भुजगपतये नमः।इदं लाजा नैवेद्यं भुजगपतये स्वाहा।३०।अदितये नमः।इदं दधि नैवेद्यं अदितये स्वाहा।३१।दि
तये नमः।इदं कुलत्थी नैवेद्यं दितये स्वाहा।३२।ब्रह्मणे नमः।चतुराननाय घृतौदनं नैवेद्यं ब्रह्मणे स्वाहा।३३।अर्यम्णे नमः॥
इदं नैवेद्यं अर्यम्णे स्वाहा।३४।विवस्वते नमः।इदं मोदकं नैवेद्यं विवस्वते स्वाहा।३५।मित्राय नमः।इदं पक्वान्नं नैवेद्यं मि
त्राय स्वाहा।३६।पृथ्वीधराय नमः।इदं पोलीका नैवेद्यं पृथ्वीधराय स्वाहा।३७।आपाय नमः।इदं मोदकं नैवेद्यं आपाय
स्वाहा।३८।आपवत्साय नमः।इदं गोधूमान्नं नैवेद्यं आपवत्साय स्वाहा।३९।सवित्रे नमः।इदं घृतौदनं नैवेद्यं सवित्रे
स्वाहा।४०।विव्राय नमः।इदं तंदुलं नैवेद्यं विव्राय स्वाहा।४१।जयंताय नमः।इदं तंदुलं नैवेद्यं जयंताय स्वाहा।४२।
विबुधाधिपाय नमः।इदं पक्वान्नं नैवेद्यं विबुधाधिपाय स्वाहा।४३।रुद्राय नमः।इदं पायसं नैवेद्यं रुद्राय स्वाहा॥

४४ रुद्रायनमः ॥ इंद्रायसनैवेद्यं रुद्रायास्वाहा ॥ ४ पापत्रे तुटत ९२ लवण सप्तधान्याशत्रुहेयंयंतु ॥ इति मंत्रेण पद्महारं कृ ॥
त्वा रहो ॥ वस्तुप्रीतये धेनुदानं ॥ पूजितोसि मया वास्तो होमाद्यैरर्चनैः शुभैः ॥ प्रसीद पाहि विश्वेश देहि मे गृहजं सुखं ॥ वास्तु ॥
पुरुष नमस्तेस्तु भूशय्यानिरत प्रभो ॥ पद्गेहं धनधान्यादिसमृद्धिं कुरु सर्वदा ॥ २ सशैलसागरां पृथ्वीं यथा वहति मूर्द्धि
नि ॥ तथा मां वह कल्याणसंपत्संततिभिः सदा ॥ ३ ततः उमामहेश्वरदानं ॥ उमामहेश्वरायनमः ॥ सप्तधान्यदानं ॥ यवगोधूम
माषाश्च मुद्गाश्च एकालंपा ॥ प्रियंगुव्रीहयश्चैव सप्तधान्यमुदाहृताः ॥ १ वास्तुदेवतानां पूजनविधिः परिपूर्णतास्तु ॥
इशान्ये चरकादेव्यै नमः ॥ उग्रसेनपांतु विदारिकायै नमः ॥ नैऋत्ये पूतनायै नमः ॥ वायव्ये पापराक्षस्यै नमः ॥ इंद्रादि दशदिक्पा
लपूजनं ॥ तत्र मंत्रपूजापाः ॥ त्रातारमिंद्रमवितारमिंद्रं हवेहवे सुहवं शूरमिंद्रं ह्वयामि शक्रं पुरुहूतमिंद्रं स्वस्ति
नो मघवा धात्विंद्रः ॥ इति इंद्रपूजनं ॥ अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे देवाँ आसादयादिह ॥ इत्यग्निपूजनं ॥ यमाय
त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशस्पाहि अर्चिरसि शोचिरसि तपो
सि ॥ इति यमपूजनं ॥ नमस्ते निर्ऋते तिग्मतेजोयस्मयं विचृता बंधमेतं यमेन त्वं यम्या संविदानोत्तमे नाके अधिरोहयैनं इति
नैर्ऋत्यपूजनं ॥ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनम
सि वरुणस्य ऋतसदनमासीद ॥ इति वरुणपूजनं ॥ वायो ये ते सहस्रिणो रथासस्तेभिरागहि नियुत्वान्सोमपीतये वर्हि
योनम ३ क्तिपञ्चंति ॥ इति कुवेरपूजनं ॥ ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत् ॥ तेन त्यक्तेन भुंजीथा मा गृधः कस्य ॥
स्विद्धनं ॥ इति ईशपूजनं ॥ ऊर्ध्व ऊषुण ऊतये तिष्ठा देवो न सविता ऊर्ध्वो वाजस्य सनिता यदंजिभिर्वाघद्भिर्विह्वयाम
हे ॥ इत्याकाशपूजनं ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां पिपृतां नो भरीमभिः ॥ इति पृथ्वीपूजनं ॥ इत्यादि मि
मंत्रैः स्तोत्रैः पूजयेत् ॥ इति दिक्पालपूजनमंत्राः ॥ अथ कलशस्थितदेवतार्चनं ॥ स्कंदायनमः ॥ १ ॥ वरुणायनमः
॥ २ ॥ गंगायैनमः ॥ ३ ॥ यमुनायैनमः ॥ ४ ॥ सरस्वत्यैनमः ॥ ५ ॥ नर्मदायैनमः ॥ ६ ॥ गोदावर्यैनमः ॥ ७ ॥ कलशायनमः ॥ ८ ॥

श्रृ०

अष्टदेवता॥ब्रह्मणे नमः॥१॥अनन्ताय नमः॥२॥यमाय नमः॥३॥विश्वकर्मणे नमः॥४॥जलौकाय नमः॥५॥धनदाय नमः॥६॥रुद्राय
नमः॥७॥विघ्नेशाय नमः॥८॥गोपाय नमः॥९॥इति पूजनं कृत्वा॥आरार्तिकं नैवेद्यं वास्तुदेवतानां पूजनविधिः परिपूर्णतामर
स्तु॥अथ पल्लवीपूजनं॥पूर्वोक्तगुणविशिष्टायां पुण्यतिथौ पाश्चात्ये शुभमुहूर्ते भूतवास्तुपूजनसमये पूर्णं महाल॥२
ल्लीपूजन नमस्कारिके॥आवाहनादि पूर्ववत्॥आरार्तिकं पंचामृतं नैवेद्यं॥एतत्पञ्चचरणं कृत्वा॥नंदे नंदय वाबासे वसु
मिश्रापुष्टिपूजा॥जयभागिविश्यापादैः पूजां मदुमावाह॥पूर्णगिरिदापादैः पूर्णाका मान्मनोरथान्॥भद्रकास्थपिदेवेर
शत्रुजानां भद्रमावह॥५सर्वबीजसमायुक्ते सर्वगंधौषधीयुते॥रुचिरे नंदने नंदे विगृह्य भागि विरम्यतां॥६ प्रजापतिस्तुते
देवि चतुरस्त्रमहापथे॥सुव्रते सुभगे देवि गृहे भागि विरम्यतां॥७॥पूजिते परमाचार्यैः गंधमाल्यैरलंकृते॥सर्वभू
तिकरी देवि गृहे भागि विरम्यतां॥८॥अव्यंगे ह्यक्षते पूर्णे मुनेय अंगिरसां स्तुते॥अहमात्त्वं प्रियाश्रेष्ठ प्रतिष्ठां गृह्यतां
कुरु॥९॥स्वामात्मा ममपुरः स्वामिपुरे मदेह मनुभ्रं पश्यत् स्वस्वधनवर्द्धिकरी भव॥१०॥पांतु देवगणेन सर्वपूजामादाय
मामकी॥सिद्धिप्रदाय विपुलां पुनरागमनाय॥११॥इति लक्ष्मीस्तुतिः॥इदानीं मातृणां ध्यानमुक्तं कुलप्रकाशतंत्रे॥सिंदूर
स्याभिमा पूज्या पीतवर्णा चतुर्भुजा॥वारुवज्रधरा दक्षे वामे भयविभ्रता॥महिमा रुद्रपूजये काकालप्रभा॥दंडा
भयधरा वामे दक्षे शक्तिमालिनी॥२॥नक्षत्रस्याल दृष्टिमास्या पूजनीया चतुर्भुजा॥नागपाशधरा दक्षे तद्वामे भयवा
रिजा॥३॥अनन्तकोटिनिभा पूज्या कूर्मस्याभिरिमा तथा॥गदावरधरा दक्षे वामे भयनिधानभृत्॥पूज्या प्रीतगदार
नीलाविद्युत्पूजने संस्थिता॥सर्वसिद्धिप्रदा देवी पद्मरागचतुर्भुजा॥पुस्तवरखड्गधरा दक्षे वामे सभयकर्तृका॥पूज्या र
यावसिता धूम्रामगस्या सा चतुर्भुजा॥सरविंदध्वजा दक्षे वामे मंदरकुंडला॥७॥पूजनीया रवा रुद्रा पिल्लु
हिमसन्निभा॥सत्रिशूले वरा दक्षे वामे साभयवारिजा॥८॥सर्वसिद्धिपद्मरागाप्रभा पूज्या चतुर्भुजा॥सा

हमालाःरविंदा ववी जपूरसरोजनी ॥८१ इति महालक्ष्मीः २ ध्या: पूजनविधिः परिपूर्णतामस्तु । सुमुहूर्ते कुंभप्रवेशने ॥ १
श्रथ कुंभपूजनं । ततो गौरं वर पत्राणि सहीराणि दूर्वा शाद्वलानि गोमयमधुघृतं कुशान् यवांश्च एतान् सर्वान् कांस्य २
पात्रे समारोप्य कं कृत्वा । पूर्वादि क्रमेण ऽभिषेकं गृहमध्ये आसनोपस्थाने प्राङ्मुखः करोति । आसनानि नागरं नाडि स्था
नानि उपस्थानि देवस्थानानि [illegible] ध्यः । अथ पूर्वे संधाव भिमर्शमं करोति । श्री अथ पश्चात् पूर्वे संधौ गोपायेतामिति २
॥ पश्चिमे संधाव भिमर्शति । अनंतं च ब्रह्मणा अथ पश्चिमे संधौ गोपायेतामिति । उत्तरे संधाव भिमर्शति ऊर्ध्वं त्वा सूनृता उ
त्तरे संधौ गोपायेतामिति । गृहमध्ये पूर्वादि अन्वारंभं करोति । अथ गृह द्वारि निष्क्रम्य पूर्वस्यां दिशि उपतिष्ठति व
हमावेशं मेपचर्या लिंग । केत्यवमास्तु केता च पुरस्ताद्गोपायेतामित्यग्निर्वै केता आदित्य स्तु कैतानौ प्रपद्य ताभ्यां नमो २
स्तु तौ मा पुरस्ताद्गोपायेतामित्यनेन मंत्रेण प्राचीं दिशमुपतिष्ठते । गोपायमाना चाम रक्षमाणा च दक्षिणतो गोपाय
तामिति । दक्षिणां दिशमुपतिष्ठते । दिदीव श्रमा जागृविश्च पश्चाद्गोपायेतामित्यन्नं वै दीदिविः प्राणो जा २
गृविस्तौ पृथिवी तैताभ्यां नमोस्तु तौ मा पश्चाद्गोपायेतामिति पश्चिममंत्रेणोपतिष्ठते । तदेवोत्तरतो गोपायेतामिति । अस्व २
प्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति । चंद्रमा वा अस्वप्नो वायुरनवद्राण एतौ प्रपद्य ताभ्यां नमोस्तु तावुत्तर
तो गोपायेतामिति । ततः प्रविशति गृहाभ्यंतरे निधिशालायां दक्षिणकोणे स्थापयेत् एकस्मिन्पात्रे धान्यं २ उ
तान्वितां दूर्वां हुतं गंधपुष्पादिकमेतत्समारं कृत्वा । स्वस्तिवाचनं [illegible] स्थिरो भवेत्यनेन मंत्रेण गर्भमध्ये स्थापयत २
दुपरि मृत्तिकां दत्वा स्वस्तिकं लिखेत् । [illegible] ततः सूत्रवेष्टनादि कूपाले बलिदानं लिंगोक्तमंत्रैः
स्वां स्वां दिशं बलिं दत्वा नमस्कारं कुर्युः । [illegible] ततो दीपकापामुक्तं [illegible] भक्ता रधिस्तु । [illegible] स २
घृतं दद्यात् [illegible] मासं मासं शुभं [illegible] ततः [illegible] गृहं [illegible] २
हीरो दत्वा संयुक्तं । [illegible] कर्म [illegible] ततः [illegible] पवामतं [illegible] कर्म [illegible] बलि

दृणेद् त्वा नदृ सूत्रवेष्टनं कुर्यात ॥ ऐंद्रं ध्यात्वा नमेत द्वि लिं इंद्राय नमः ॥ त्रातारमिंद्रमवितारं ॐ हवे हवे सुहवं ॐ शूरमिंद्रं ह्व
यामि ॥ शक्रं पुरुहूतमिंद्रं ॐ स्वस्ति नो मघवा धात्विंद्रः ॥ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे देवाँ आसादयादिह ॥
स घृतमेकाम मग्नेयाग्नये नमः ॥ मांसमाषौदनं नमेत द्वि लिं दक्षिणस्यां दिशि यमाय नमः ॥ यमाय त्वा मखाय त्वा सूर्य्य
स्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु ॥ पृथिव्याः सं ॐ स्पृशस्पाहि ॥ अर्चिरसि शोचिरसि तपोसि ॥ मांसमा
षौदनं नमेत द्वि लिं नैरृत्यां नैरृत्याय नमः ॥ नमः सु ते निरृते तिग्मतेजोऽयस्मयं विचृता बंधमेतं यमेन त्वं यमा संविदा
नोत्तमे नाके अधिरोहयैनं ॥ क्षीरौदनं कृशरं मिश्रमेत द्वि लिं प्रतीच्यां वरुणाय नमः ॥ वरुणस्योत्तंभनमसि ॥
वरुणस्य स्कंभसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदन ॥
मासीद ॥ पूरीहोदनमेत द्वि लिं वायव्यां वायवे नमः ॥ वायो ये ते सहस्रिणो रथासस्तेभिरागहि नियुत्वान् सोम ॥
पतये ॥ दुग्धमोदनं शर्करा मेत द्वि लिं उदीच्यां कुबेराय नमः ॥ सोमो धेनुं ॐ सोमो अर्वंतमाशुं सोमो वीरं कर्मण्यं
ददाति ॥ सादन्यं विदथ्यं ॐ सभेयं पितृश्रवणं यो ददाशदस्मै ॥ पक्वान्नं चान्नं वा मत्स्यमेतमेत द्वि लिं ऐ
शान्यां ॥ ईशानाय नमः ॥ ईशावास्यमिदं ॐ सर्वं यत्किंचिज्जगत्यां जगत् ॥ तेन त्यक्तेन भुंजीथा मा गृधः
कस्यस्विद्धनं ॥ दध्योदनं ऊर्ध्वं ब्रह्मणे नमः ॥ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्या
धी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य य
जमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां योगक्षेमो नः क
ल्पतां ॥ घृतौदनं मध्वा पृथिव्यै नमः ॥ स्योना पृथिवि ॥ इति दिक्पालेभ्यो बलिं दत्वा ॥ सूत्रवेष्टनमिति ॥

मासनापाबंजनपंतुरेवाः स्वाहा॥ इति पूर्णाहुति॥ ततउपविस्य श्रुवेण भस्मानीय दक्षिणानामिकाग्र गृहीत भस्मना। त्र्यायुषं यम
मदग्नेः इति ललाटे। ॐ कस्यपस्य त्र्यायुषं। इति ग्रीवायां। ॐ यद्देवेषु त्र्यायुषं मिति दक्षिणबाहुमूले। ॐ तन्नो अस्तु त्र्यायुषं मि
ति हृदि॥ इति श्री मुग्धप्रबोधे शालाकर्म वास्तुपूजा संकल्प बलिदानादिक संपूर्णमिति॥ अथ गृहप्रवेश प्रतिष्ठा समग्री
विधानं लिख्यते॥ मांडणा च वेदी।१। कलश।। आम्रपल्लव। कलश। वर्द्धनी।१। आज्यस्थाली।२। ताम्रस्य।१। चरुस्थाली।१। कांश
पात्र हुं।२। प्रणीता पात्र।२। सरतंदुल।१। पूर्णपात्र।२। नालयेर।१। सुपारी १०। चंदन।२। पुष्प नाना विधानके। धूप अगर। गुगल
दीप।२। पानेवेद्यानि गुडानां भोज्यान्नं। केसरान्नं। मासा।२। तांबूलानि।१। स्थाली तन्मध्ये औदुंबरपत्रं। दूर्वा। गोमय। दधि। मधु।
घृतं। श्रुवा। वलोकनार्थं छत्र पात्रे। यवाः। कुश। पंचवस्त्राणि। आसनवस्त्र। उत्तरीय। कमंडलु। कुंडल। घटस्थापनार्थं वस्त्र।२।
वस्त्र। गृहस्थापनार्थं वस्त्र। वितानं वेद्या परि पंचरंग॥ ५। तत्र स्थापनार्थं वस्त्र यजमान परिधानार्थं वस्त्र
।।२। समिधा। घृत। श्रुकश्रुवौ।२। सरकरा। मधु। दुग्ध। मुद्रा। वस्त्र।२। प्रवाल।१। मौक्तिक।१। हेम।१। रजत।२। ताम्र। नारंगी।
जंबीरी।२। बीजपूरक। दाडिम।१। मौली। सरसप। गृहदेवार्चनार्थं पंचरंगसूत्र। एला।२। विरा च बीज। पूरसरोजिनी॥ इति श्री
महालक्ष्मी देव्याः पूजन विधिः परिपूर्णमस्तु। सुमुहूर्ते कुंभप्रवेशनं। अथ कुंभपूजनं॥ ततो औदुंबरपत्राणि सहितानि दूर्वा
ङ्कुरानि। गोमय मधु घृत कुशा यवा अक्षतान् सर्वान् संभारान्का स्थापात्रे कृत्वा। उदकपात्र सहितं संभारं एकंचकृत्वा। पूर्व
वादिक्रमेण अभिषेकं। गृहमध्ये आसनोपस्थाने प्रोक्षणं करोति। आसनादि नागदंतादि स्थानानि उपस्थानानि देवस्था
नानि प्रोक्षणी पानीत्यर्थः। अथ पूर्व संधावभिमृशनं करोति। श्री श्वतायशा अपूर्वसंधौ गोपायेताम् इति॥ अनेन मंत्रेण
॥ ततो दक्षिणे संधावभिमृशति यज्ञस्य त्वा दक्षिणया दक्षिणे संधौ गोपायेताम् इति। पश्चिमे संधावभिमृशति। अन्नं च ब्राह्म
णा अपश्चिमे संधौ गोपायेताम् इति। उत्तरे संधावभिमृशति। ॐ ऊर्ज्जत्ता सूनृता च उत्तरे संधौ गोपायेताम् इति। गृहमध्ये
पूर्वादि त्वा पंचकषाय। पंचपल्लव। पंचमृत्तिकानां। सर्वौषधयः। गृहस्थापनार्थं पंचरंग चूर्णं। दसपताका। तोरण। समीपत्रा॥

॥ततो दिक्पालेभ्यो नमस्कार्यात्। अनेन श्लोकेन। ॐ दिक्पालाय नमः। तुभ्यं मम शांतिं करोमि वा दोषोपशमनार्थाय शालां मम भुंजी
कुरु॥ इति मंत्रेण। ऽस्य कं दानं सप्रवेशनं। ततः समाप्राप्य शालोपांते द्वाराऽनुकूले पुरोपहृतिमात्रपूजाऽभ्युदयकं विधाय स्नात्रेण
पुरस्सरः स्नातः शुक्लांबरधरः शुक्लमालानुलेपनः। तादृशः पुत्रपौत्रादिसमेतोऽपरकारणाद्य शालाद्वारेण प्रविशति। धर्मस्य पूरणाय नुमंश्री
धर्मसममहोरात्रे द्वारपालकैः। इंद्रस्य गृहे वसुमतो वरूथिनं तानहं प्रपद्ये सह प्रजया पशुभिः सह। येन किंचिद स्युपहूतः सर्वं।
धनसर्वचार्यः साधुसंवृतः। तां त्वां शाले अरिष्टवीरा गृहान्नः संतु सर्वतः इति। अनेन मंत्रेण। ततः शालाधिपतिं प्रार्थयेत् दोषोपशमनाय॥
प्रार्थयामि त्वहं देवी शालेयमधिपस्तु यः। प्रायश्चित्तप्रसंगेन गृहार्थे यन्मया कृतं। मूलच्छेदं तृणच्छेदं कृमीणां च निपातितं। हतं जल
जीवानां भूमिशस्त्रेणाघातितं। अनंतं भाषितं यच्च किंचिद्दृश्यस्य पातनं। एतत्सर्वं क्षमस्वेदं यन्मया दुःकृतं कृतं। गृहार्थे पतितं तं पापं
अस्ताने नाप चेतसा। ततः सर्वं हृष्टं तो देवशालां मम भुं भोकुरु। संश्रव प्राशनं। पूरणपात्रं ब्राह्मणेभ्यो दानं॥ अतिथिभ्यः प्रदानं। आचार्या
द्विगुणं देयं। शय्यादानादिकं देयं। सर्वेभ्यो ब्राह्मणेभ्यो भूरिदानं। वित्तशाठ्यमिति पतः। दानं दद्याद्यथाशक्ति गां गिनिर्विप्रसमर्पण
॥वेदमां गत्य निर्धीपैर्भोजयेद्वंधुभिः सह। १। ततो ब्राह्मणभोजनं। संकल्प्य। काश्यपात्रे मुखावलोकनं। पूर्णाहुतिः। अरिष्टपुण्याहे
वाचने तिलकंकरणं। आशीर्वाद ग्रहणं। अथ गृहविशेषवास्तुपूजनं। दक्षिणद्वारे। धात्रे नमः। वामद्वारे विधात्रे नमः। गगने शा
पनमः। श्रियै नमः। पट्टशालायै नमः। मंडपदेवताभ्यो नमः। कुंडनीभ्यो नमः। पर्जन्याय नमः। ८। पश्चात् चुल्यादि बलिदानं। उक्तमंत्रेण॥
धर्माय नमः। इति चुल्लीदक्षिणवाहे। पुनः धर्माय नमः। वामवाहे। ॐ स्वर स्वर सपरिवर्तनी पाय नमः। किं धान्यादिभांडेषु। ॐ उ
लाम्रतापवरूण्याय नमः। जलभांडेषु। ॐ महाविघ्नराजाय नमः। गृहप्रधानद्वारे। ॐ सुमंगाय नमः। इति पंचशस्यां। कूट कोटि गिर
के नमः। इत्युलूखले नमः। ॐ वलभद्रप्रियाय प्रहरणाय नमः। इति मुशले। ॐ मस्त्यवेदेवी चादितेन नमः। इति संमार्जन्यां। ॐ का
माय कुशमायुधाय नमः। इति शयनीय सिरसि॥ ॐ स्कंदाय गृहाधिपतये नमः। चतुष्पद शालायां गवादिषु निवासे के मूत्रपुरीषत
जस्थाने बलिदानं। मार्गे च मार्गदेवताभ्यो नमः। मध्यस्तंभाधस्तात्। ततः उपाय। फलपुष्पसमन्वित यजमान दक्षिणकर स्पृष्ट नभु
वेरणपूर्णांकुंतिरद्यात्॥ ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं। कविं सम्राजमतिथिं जनानां

ॐ सर्वे भो उपद्रा पे पेहा ॐ नमो स्तु सर्पभ्यो पे केचि
री॥ शय्या॥ जापकानां आसना धोती॥ उपर्णा॥ कमंडलु॥ सप्तधान्य॥ वर्णकं आला भे॥ त्रिभ् विधान संपूर्णम्॥ अथ प्रभुमं संवत्सरे ऽ स्मिन् २
त्पृथ्वीमनु॥ येंतरिक्षे पे दिवि तेभ्यः सर्पेभ्यो नमः॥ १॥ इति श्री मुग्धेशाला सम ग्री विधान संपूर्णम्॥ अथ प्रभु मं संवत्सरे का र्तिक गते दिना ४॥
श्रीन्रपति विक्रमादित्य राज्ये संवत् १९८१७७ मासोत्तम मासे आश्विन शुक्ल पक्षे दशम्यां भौम वासरे कार्तिक गते दिना ४॥
मि मित्ताय स्वाहा॥ ॐ संमिताय स्वाहा॥ ॐ शालाय स्वाहा॥ ॐ कुटकाय स्वाहा॥
ॐ राजपुत्राय स्वाहा॥ यथा वाणं प्रहाराणां कवचं भवति वारणं॥ तद्वद्देवोपघा
तानां शांतिर्भवति वारणं॥ भिद्यते कवचं घोरा भिद्यते गिरिगह्वरा॥ भिद्यते स
र्व शास्त्राणि आभे धात्रा हरणाशिष॥ यथा समुत्थितं यंत्रं मंत्रेण प्रतिहन्यते॥
यथा समुत्थितं घोरं शीघ्रं प्रशमयाप्रशस्यते॥ जदगावा नरेंद्राः ब्राह्मणाः
विशेषतः॥ पूजिता प्रतिवाध्यंते सावधाना भवंतु मे॥ सुराचैनेन दानेन साधू
नां संगमेन च॥ स्वस्त्यस्तु प्रविप्राणां मल्यम त्यु विवर्जितः॥ ॐ द्यौ शांतिः॥
अपः शांतिः सामा शांतिः॥ ब्रह्मा शांति॥ विश्वे शांति॥ वनस्पति शांति॥
शांतिरेवाः शांति सर्वं शांतिः पदृदुतन्न पा सवः॥ पं पं वित पते का मं तत
प्राप्नोति निष्कृतं॥ इति निष्कृतं॥ इति यजमान सपरवारि मशिव भवतु॥
ॐ भम रामचंद्राय नमः॥ रामा क्षिप्रा यनमः॥ रामाय नमः॥
रा मन्॥ रा मन्॥ रा मन्॥ रा मन्॥ रा मन्॥ रा मन्॥ रा मन्॥
ऽ रा मन्न रा मन्न रा मन्न रा मन्न रा म॰ ऽरा मन्न रा म॰ न्न रा म॰॥
वा म म दा बा न दी य ते॥ गो विंदाय नमः॥
याद्रुसंपुस्तकं दृष्ट्वा तादृसं लिखितं मया स्तु द्धं च शुद्धं

१	२	३	४	५	६	७	८	९
३२	३३						३४	१०
३१								११
३०			४५	३८	३९			१२
२९			४४	३७	४०			१३
२८			४३	४२	४१			१४
२७								१५
२६	३६						३५	१६
२५	२४	२३	२२	२१	२०	१९	१८	१७